सर्वारम्भपरित्यागी गुणातीत स उच्यते ॥ १४ २५ ॥

26 मा च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ १४ २६ ॥

27 ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ १४ २७ ॥

28 ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १५ १ ॥

29 अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके ॥ १५ २ ॥

30 न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलम्
असङ्गशस्त्रेण दृढेन छित्त्वा ॥ १५ ३ ॥

31 ततः पदं तत् परिमार्गितव्यं
यस्मिन् गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥ १५ ४ ॥

32 निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ १५ ५ ॥

33 न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ १५ ६ ॥

34 ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ १५ ७ ॥

35 शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ १५ ८ ॥

36 श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ १५ ९ ॥

37 उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १५ १० ॥

38 यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ १५ ११ ॥

*1 यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १५ १२ ॥

*2 गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १५ १३ ॥

*3 अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १५ १४ ॥

* 4 सवस्य चाह हृदि संनिविष्टो
मत्त स्मृतिर्ज्ञानमपोहन च।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ॥ १५ १५ ॥

39 द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षर सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १५ १६ ॥

40 उत्तम पुरुषस्त्वन्य परमात्मेत्युदाहृत ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर ॥ १५ १७ ॥

41 यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तम ।
अतोऽस्मि लोके वेदे च प्रथित पुरुषोत्तम ॥ १५ १८ ॥

42 यो मामेवमसमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मा सर्वभावेन भारत ॥ १५ १९ ॥

43 इति गुह्यतम शास्त्रमिदमुक्त मयानघ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥ १५ २० ॥

The second elaboration of the Bhagavadgita came also from the Bhakti side only it is now Bhakti based upon metaphysical knowledge particularly the knowledge of the Samkhya doctrine of three guṇas The Samkhya is of course theistic Samkhya (XIV 4), and its knowledge is merely a means to Bhakti and finds its fulfilment in the love of God (XV 19) This is the viewpoint of the Śaṇḍilya sutras just as *prapatti* is the view point of the Narada sutras According to Otto we owe to the author of this Tract 43 stanzas which are continuous but were subsequently enlarged by an addition from the Vedantic side of 4 stanzas Ignoring this last the Gita now became a poem of 220 stanzas It is says Otto inconceivable that the author of Tract I could have written Tract II or that of Tract II Tract I On the other hand the opening of Tract II suggests that its author is aware of Tract I and in contradistinction from it he is giving here a superior sort of Bhakti I am afraid Otto is here allowing too free a play to his imagination

Otto has furnished a neat analysis of the Tract (i)—Introduction XIV 1 2 Knowledge affords a more stable salvation through Bhakti (ii)—XIV 3 18 The knowledge meant is the knowledge that the three guṇas springing from Prakṛti into which the Lord plants His seed are responsible for the chain of Samsara. (iii)—XIV 19 20 Hence the realisation that activity belongs to the guṇas and not to the soul secures immortality This answer which is the legitimate Samkhya answer is hardly given (XIV 21 25) when it is supplanted by the correct answer from the Bhakti

point of view (iv)—XIV 26 27 Otto says that this very procedure of giving an inadequate answer and then proceeding to correct it marks the anxiety of the later author to draw older speculations into his service He therefore blames Garbe for rejecting XIV 26 27 where "Brahman' occurs twice (v)—XV 1 6 An old hymn is next quoted and briefly explained (vi)—XV 7-18 (minus st 12 15) present a Viśiṣṭādvaita cosmology in which the soul (=akṣara) is declared to be a real amśa or part of the Lord and the doctrine of "Triune unity" definitely inculcated (vii)—XV 19 20 give the conclusion which agrees with the Introduction

Our criticism of the above is as follows The doctrine of the three guṇas is often held to be a pre sāmkhya tenet[1] The doctrine which considers the soul as the real amśa of the Lord also considers[2] the soul as real agent (kartṛ) and not the guṇas as XIV 19 and even XIV 23 emphatically assert If this latter doctrine be a pūrvapakṣa, to be subsumed and transcended by XIV 26, one would expect a clearer indication of it To what period in the evolution of the Sāmkhya philosophy would Otto assign a seśvara Sāmkhya holding these views about the *amsatva* and the *kartṛtva*? The Viśiṣṭādvaita doctrine of Triune unity includes, besides the Cit or soul the Acit or the world as together constituting the body of the Lord The latter factor is brought in as the "kṣara" in XV 16 17 Stanzas XV 12 15 according to Otto, disturb the sequence by bringing in that factor too early and Otto following Garbe, regards these four stanzas as an interpolation by the ' Brahman theologue It is forgotten that of these stanzas the first two specify in detail the Acit factor and the last two the Cit factor And then they could later be briefly alluded to as the kṣara and the akṣara factors Otto however, says[3] that the real purpose of the "interpolated' stanzas is to mitigate the harshness of the dualism between the kṣara and the akṣara factors by drawing attention to the interpenetration by the Lord of both these factors in the sense of pantheistic advaita If this be so the interpolator would be proved to be a philosopher with a synthetic power of no mean order, and the oftener Otto is able to catch him in the act the better it would be for our own ultimate thesis

It is not quite clear to me whether the eight Tracts which Otto discovers in the Bhagavadgītā have been numbered by him in

1 Compare Jacobi NGGW, 1896 pp 43 ff Compare also *Lehrtraktate* p 14
2 See Ramānuja on *Brahmasūtra* II iii 40
3 *Lehrtraktate* pp 10-11

a chronological sequence so that the first Tract was the first, and the eighth the last, to be added to the Poem The Tracts he has divided into two groups Tracts added to the latter half of the Gītā (viz Tracts I to IV), and Tracts added to the first half (viz Tracts V to VIII) In order to bring out Otto's thesis in a clearer relief it would have been better to assume that the first additions made to the 'Original" Gītā all came from the Bhakti schools of various types and denominations Then the Rationalist Samkhya Yoga schools may be supposed to have had their go at it, and finally, it may have been argued, came in the 'Brahman theologue' who seems to have made his intruding personality felt all along the line There is nothing in such an assumption that would have been repugnant to Otto's thesis he might have even welcomed it It would of course involve our considering after Tracts I and II, Tracts VI VIII and Appendix to Tract III in this sequence first, and then passing on to Tracts VII, IV, V, and III As a matter of fact Otto gives no reasons why Tract III must come immediately after Tract II Its character is so different from the Bhakti additions made hitherto fore Tract VI which gives a form of Bhakti would form a better sequel to Tract II Otto thinks that Tract VI purports to give a better answer to the question mooted at the opening of Tract V (stanza V 1) But he himself tells us that the spirit of the two answers is radically different However, in order not to introduce unnecessary complications we will follow Otto's sequence of the Tracts considering it as chronological Tract III runs thus—

## THIRD TRACT

( Ethico Religious Dualism on देव-असुर basis and a 'Trialism' on त्रिगुण basis with a Bhakti appendix XVIII 50-55 by the author of Tract I)

### XVI—XVIII 49

श्रीभगवानुवाच—

1 अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १६ १ ॥
2 अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ १६ २ ॥
3 तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥ १६ ३ ॥
4 दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ १६ ४ ॥

5 दैवी सपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुच सपद दैवीमभिजातोऽसि पाण्डव ॥ १६ ५ ॥
6 द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरश प्रोक्त आसुरं पार्थ मे शृणु ॥ १६ ६ ॥
7 प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा ।
न शौच नापि चाचारो न सत्य तेषु विद्यते ॥ १६ ७ ॥
8 असत्यमप्रतिष्ठ ते जगदाहुरनीश्वरम् ।
अपरस्परसभूत किमन्यत्कामहैतुकम् ॥ १६ ८ ॥
9 एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धय ।
प्रभवन्त्युग्रकर्माण क्षयाय जगतोऽहिता ॥ १६ ९ ॥
10 काममाश्रित्य दुष्पूरं दम्भमानमदान्विता ।
मोहाद्गृहीत्वासद्ग्राहान् प्रवर्तन्तेऽशुचिव्रता ॥ १६ १० ॥
11 चिन्तामपरिमेया च प्रलयान्तामुपाश्रिता ।
कामोपभोगपरमा एतावदिति निश्चिता ॥ १६,११ ॥
12 आशापाशशतैर्बद्धा कामक्रोधपरायणा ।
ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १६ १२ ॥
13 इदमद्य मया लब्धमिम प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १६ १३ ॥
14 असौ मया हत शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमह भोगी सिद्धोऽह बलवान् सुखी ॥ १६ १४ ॥
15 आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता ॥१६,१५ ॥
16 अनेकचित्तविभ्रान्ता मोहजालसमावृता ।
प्रसक्ता कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६ १६ ॥
17 आत्मसभाविता स्तब्धा धनमानमदान्विता ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१६ १७ ॥
18 अहकारं बल दर्पं काम क्रोध च सश्रिता ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयका ॥१६ १८ ॥
19 तानह द्विषत क्रूरान् ससारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १६ १९ ॥
20 आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमा गतिम् ॥१६ २० ॥
21 त्रिविध नरकस्येद द्वारं नाशनमात्मन ।
काम क्रोधस्तथा लोभस्तस्मादेतत् त्रय त्यजेत् ॥ १६ २१ ॥
22 एतैर्विमुक्त कौन्तेय तमोद्वारैस्त्रिभिर्नर ।
आचरत्यात्मन श्रेयस्ततो याति परा गतिम् ॥ १६ २२ ॥

23 य शास्त्रविधिमुत्सृज्य वर्तते कामकारत ।
न स सिद्धिमवाप्नोति न सुख न परां गतिम् ॥१६ २३ ॥
24 तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्त कर्म कर्तुमिहार्हसि ॥१६ २४ ॥

अर्जुन उवाच—

25 ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विता ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तम ॥१७ १ ॥

श्रीभगवानुवाच—

26 त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ १७ २ ॥
27 सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्ध स एव स ॥ १७ ३ ॥
28 यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसा ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जना ॥ १७ ४ ॥
*1 अशास्त्रविहित घोर तप्यन्ते ये तपो जना ।
दम्भाहंकारसंयुक्ता कामरागबलान्विता ॥ १७ ५ ॥
*2 कर्शयन्त शरीरस्थ भूतग्राममचेतस ।
मा चैवान्त शरीरस्थ तान् विद्ध्यासुरनिश्चयान् ॥ १७ ६ ॥
29 आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रिय ।
यज्ञस्तपस्तथा दान तेषां भेदमिम शृणु ॥ १७ ७ ॥
30 आयु सत्त्वबलारोग्यसुखप्रीतिविवर्धना ।
रस्या स्निग्धा स्थिरा हृद्या आहारा सात्त्विकप्रिया ॥ १७ ८ ॥
31 कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन ।
आहारा राजसस्येष्टा दुखशोकामयप्रदा ॥ १७ ९ ॥
32 यातयाम गतरसं पूति पर्युषित च यत् ।
उच्छिष्टमपि चामेध्यं भोजन तामसप्रियम् ॥ १७ १० ॥
33 अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मन समाधाय स सात्त्विक ॥ १७ ११ ॥
34 अभिसंधाय तु फल दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ त यज्ञं विद्धि राजसम् ॥ १७ १२ ॥
35 विधिहीनमसृष्टान्न मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहित यज्ञ तामस परिचक्षते ॥ १७ १३ ॥
36 देवद्विजगुरुप्राज्ञपूजन शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १७ १४ ॥
37 अनुद्वेगकरं वाक्य सत्य प्रियहित च यत् ।
स्वाध्यायाभ्यसन चैव वाङ्मय तप उच्यते ॥ १७ १५ ॥

38 मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते ॥ १७.१६ ॥

39 श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७.१७ ॥

40 सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १७.१८ ॥

41 मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत् तामसमुदाहृतम् ॥ १७.१९ ॥

42 दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ १७.२० ॥

43 यत् तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ १७.२१ ॥

44 अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत् तामसमुदाहृतम् ॥ १५.२२ ॥

* 3, ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ १७.२३ ॥

* 4 तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ १७.२४ ॥

* 5 तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ १७.२५ ॥

* 6 सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ १७.२६ ॥

* 7 यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ १७.२७ ॥

* 8 अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह ॥ १७.२८ ॥

अर्जुन उवाच—

45 संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक् केशिनिषूदन ॥ १८.१ ॥

श्रीभगवानुवाच—

46 काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ १८.२ ॥

47 त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ १८.३ ॥

48 निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ १८.४ ॥

* 9 यज्ञदानतप:कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ १८ ५ ॥

* 10 एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ १८ ६ ॥

49 नियतस्य तु सन्यास कर्मणो नोपपद्यते ।
मोहात् तस्य परित्यागस्तामस परिकीर्तित ॥ १८ ७ ॥

50 दु खमित्येव यत् कर्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजस त्यागं नैव त्यागफल लभेत् ॥ १८ ८ ॥

51 कार्यमित्येव यत् कर्म नियत क्रियतेऽर्जुन ।
सङ्ग त्यक्त्वा फल चैव स त्याग सात्त्विको मत ॥ १८ ९ ॥

52 न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशय ॥ १८ १० ॥

53 न हि देहभृता शक्य त्यक्तु कर्माण्यशेषत ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ १८ ११ ॥

54 अनिष्टमिष्ट मिश्र च त्रिविधं कर्मण फलम् ।
भवत्यत्यागिना प्रेत्य न तु सन्यासिना क्वचित् ॥ १८ १२ ॥

* 11 पञ्चैतानि महाबाहो कारणानि निबोध मे ।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १८ १३ ॥

* 12 अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ॥ १८ १४ ॥

* 13 शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नर ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतव ॥ १८ १५ ॥

* 14 तत्रैवं सति कर्तारमात्मानं केवलं तु य ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति ॥ १८ १६ ॥

* 15 यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ १८ १७ ॥

55 ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविध कर्मसंग्रह ॥ १८ १८ ॥

56 ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदत ।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥ १८ १९ ॥

57 सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ १८ २० ॥

58 पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ १८ २१ ॥

59 वेत्ति कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत् तामसमुदाहृतम् ॥ १८ २२ ॥

60 नियतं सङ्गरहितमरागद्वेषत कृतम् ।
अफलप्रेप्सुना कर्म यत् तत् सात्त्विकमुच्यते ॥ १८ २३ ॥

61 यत् तु कामेप्सुना कर्म साहंकारेण वा पुन ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ १८.२४ ॥
62 अनुबन्धं क्षय हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत् तत् तामसमुच्यते ॥ १८ २५ ॥
63 मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वित ।
सिद्ध्यसिद्ध्योर्निर्विकार कर्ता सात्त्विक उच्यते ॥ १८ २६ ॥
64 रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचि ।
हर्षशोकान्वित कर्ता राजस परिकीर्तित ॥ १८ २७ ॥
65 अयुक्त प्राकृत स्तब्ध शठो नैष्कृतिकोऽलस ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ १८ २८ ॥
66 बुद्धेर्भेद धृतेश्चैव गुणतस्त्रिविध शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ १८.२९ ॥
67 प्रवृत्ति च निवृत्ति च कार्याकार्ये भयाभये ।
बन्ध मोक्ष च या वेत्ति बुद्धि सा पार्थ सात्त्विकी ॥ १८ ३० ॥
68 यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत् प्रजानाति बुद्धि सा पार्थ राजसी ॥ १८ ३१ ॥
69 अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान् विपरीतांश्च बुद्धि सा पार्थ तामसी ॥ १८ ३२ ॥
70 धृत्या यया धारयते मन प्राणेन्द्रियक्रिया ।
योगेनाव्यभिचारिण्या धृति सा पार्थ सात्त्विकी ॥ १८ ३३ ॥
71 यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृति सा पार्थ राजसी ॥ १८ ३४ ॥
72 यया स्वप्न भय शोक विषाद मदमेव च ।
न विमुञ्चति दुर्मेधा धृति सा पार्थ तामसी ॥ १८ ३५ ॥
73 सुखं त्विदानीं त्रिविध शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दु खान्त च निगच्छति ॥ १८ ३६ ॥
74 यत् तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत् सुख सात्त्विक प्रोक्तमात्मबुद्धिप्रसादजम् ॥ १८ ३७ ॥
75 विषयेन्द्रियसयोगाद्यत् तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुख राजस स्मृतम् ॥ १८ ३८ ॥
76 यदग्रे चानुबन्धे च सुख मोहनमात्मन ।
निद्रालस्यप्रमादोत्थ तत् तामसमुदाहृतम् ॥ १८ ३९ ॥
77 न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुन ।
सत्त्व प्रकृतिजैर्मुक्त यदेभि स्यात् त्रिभिर्गुणै ॥ १८ ४० ॥
78 ब्राह्मणक्षत्रियविशा शूद्राणा च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणै ॥ १८ ४१ ॥

79 शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ १८.४२ ॥

80 शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ १८.४३ ॥

81 कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ १८.४४ ॥

* 16 स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ १८.४५ ॥

* 17 यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ १८.४६ ॥

82 श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ १८.४७ ॥

83 सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ १८.४८ ॥

84 असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ १८.४९ ॥

§ 1 सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ १८.५० ॥

§ 2 बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ १८.५१ ॥

§ 3 विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ १८.५२ ॥

§ 4 अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ १८.५३ ॥

§ 5 ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ १८.५४ ॥

§ 6 भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ १८.५५ ॥

§ 7 सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ १८.५६ ॥

§ 8 चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ १८.५७ ॥

---

§ The eight stanzas constitute an independent appendix, intended to bridge the subsequent transition to the Orig. Poem and calculated to enlist, says Otto, Tract III to the elaborator's purpose.

As observed before the addition of this Tract at this stage to the Gita as it then existed is utterly unmotivated The Tract is followed by an Appendix (XVIII 50 57) conceived from a Bhakti view point which comes nearer to the philosophic Bhakti of Tract II or the mystic Bhakti of Tract VI Otto blames Garbe for omitting XVIII 53 54 as a Vedantic interpolation and avers that the author of the whole Appendix including stanzas 53 54 is an advaita Bhakta He however unnecessarily[1] multiplies entities by supposing that its author is a different Bhakta from the five other Bhakta interpolators whom he has raised up ! As a matter of fact the different types of Bhakti in practice hardly remained water tight

The original tract consists of 84 or rather 86 stanzas[2] It has super added to it a Samkhya gloss of five stanzas (XVIII 13 17= *11 *15) the gloss of the Brahman theologue of six stanzas (XVII 23 28=*3 *8) and four stanzas (viz *9 *10 *16 and *17) of miscellaneous gloss If Tract III was added after Tract II the Gita as it left the hands of the author of Tract III had become ignoring the glosses and the appendix a Poem of 306 stanzas

The Tract falls into two main divisions The first consists of Chapter XVI and gives a popular non scholastic and non sectarian sermon on morality based on Deva Asura dualism with a strong polemic against the heretic and an adjuration to follow the Śastra on all matters of doubt The second division consists of Chapter XVII (minus stanzas 23 28) and Chapter XVIII 1 49 (minus stanzas 13 17 and 45 46) It also has the same popular character but it bases its teaching on the triad of guṇas and in a methodical manner describes categories like Faith Food Sacrifice Penance and Gifts on the basis of the Sattva Rajas Tamas division It raises up the ethical problem of activism versus renunciation which gave rise to the Bhagavadgita and decides against renunciation by classifying renunciation on the same triple basis of guṇas As to activism that in its turn leads to a similar classification of the result of action of the conditions of action—viz the knowledge the knower and the known (or the act the actor and the action)—of the intellect and of the sustaining power (dhṛti) during the activity and

---

1 Otto's attempt (*Lehrtraktate* pp. 19 20) to show how Brahman knowledge was subsumed by this type of Bhakta under his own Bhakti view point is not very convincing I do not see anything of the magical value of knowledge anywhere in this Appendix whatever may or may not be the case in the Harivamsa passages quoted

2 Stanzas XVII 5 6 (=*1 *2) need not be regarded as a doubtful gloss. They would be as Otto himself points out in their place after XVII 19

of the pleasure which results from it It concludes with an enumeration of the duties of the four castes, which are theoretically based on the same traiguna division, and a concluding adjuration for everyone to do his prescribed duty in a mood of detachment. The Tract is said to be a well-ordered unit save for the disturbing glosses (XVII 23 28 and XVIII 13 17 and XVIII 45-46) the first and the last of which Garbe had also omitted Stanzas XVIII 5 6 are a sheer interpolation As to the appendix (XVIII 50-57) we have already made our comments (p 98) We fail to see why it was attached by Otto to this Tract at all unless it be because the last stanza of the Tract links itself on to the first stanza of the Appendix But that is the normal trick of the trade, and its author may nevertheless have been the same as that of Tract II or preferably of Tract VI

Tract IV sets forth the Seśvara Sāmkhya in a popular form It nevertheless places very little emphasis on the Bhakti and the treatment is more rational than emotional Hence, says Otto, its author cannot be the same as that of Tract II The Tract constitutes the Thirteenth Chapter, but out of its 34 stanzas 12 (preceded by starred numbers) are Vedāntic glosses or interpolations. The general character of the Tract lent itself easily to comments and corrections so as to make its teaching in stricter accord with the "Brahman theology" Garbe had already ejected all these 12 stanzas as interpolations. He had moreover suspected 3 more stanzas (XIII, 31-33) as also Vedāntic. Otto however finds pure Sāmkhya teaching in them, that is to say, Seśvara Sāmkhya The Tract increased the extent of the then Gītā to 328 stanzas The text runs as follows —

## FOURTH TRACT

(सेश्वरसांख्य in popular form. Bhakti not stressed)

XIII 1—34

श्रीभगवानुवाच—

1 इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१३.१॥

* 1 क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥१३.२॥

2 तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥१३.३॥

* 2 ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥१३.४॥

3 महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥१३.५॥

4 इच्छा द्वेष सुखं दुःख संघातश्चेतना धृति ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥१३ ६ ॥

5 अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासन शौच स्थैर्यमात्मविनिग्रह ॥१३ ७ ॥

6 इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥१३ ८ ॥

7 असक्तिरनभिष्वङ्ग पुत्रदारगृहादिषु ।
नित्य च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ १३ ९ ॥

8 मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १३ १० ॥

9 अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥१३ ११ ॥

* 3 ज्ञेय यत् तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत् पर ब्रह्म न सत् तन्नासदुच्यते ॥ १३ १२ ॥

* 4 सर्वत पाणिपाद तत् सर्वतो क्षिशिरोमुखम् ।
सर्वत श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ १३ ॥

* 5 सर्वेन्द्रियगुणाभास सर्वेन्द्रियविवर्जितम् ।
असक्त सर्वभृच्चैव निर्गुण गुणभोक्तृ च ॥ १३ १४ ॥

* 6 बहिरन्तश्च भूतानामचर चरमेव च ।
सूक्ष्मत्वात् तदविज्ञेय दूरस्थ चान्तिके च तत् ॥ १३ १५ ॥

* 7 अविभक्त च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेय ग्रसिष्णु प्रभविष्णु च ॥ १३ १६ ॥

* 8 ज्योतिषामपि तज्ज्योतिस्तमस परमुच्यते ।
ज्ञान ज्ञेय ज्ञानगम्य हृदि सर्वस्य धिष्ठितम् ॥ १३ १७ ॥

* 9 इति क्षेत्र तथा ज्ञान ज्ञेय चोक्त समासत ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १३ १८ ॥

10 प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ १३ १९ ॥

11 कार्यकरणकर्तृत्वे हेतु प्रकृतिरुच्यते ।
पुरुष सुखदु खाना भोक्तृत्वे हेतुरुच्यते ॥ १३ २० ॥

12 पुरुष प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारण गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ १३ २१ ॥

13 उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वर ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुष पर ॥ १३ २२ ॥

14 य एव वेत्ति पुरुष प्रकृतिं च गुणै सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ १३ २३ ॥

15 ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेण चापरे ॥ १३ २४ ॥




16 अन्ये त्वेवमजानन्त श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्यु श्रुतिपरायणा ॥ १३ २५ ॥

17 यावत् सजायते किंचित् सत्त्व स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसयोगात् तद्विद्धि भरतर्षभ ॥ १३ २६ ॥

* 10 सम सर्वेषु भूतेषु तिष्ठन्त परमेश्वरम् ।
विनश्यत्स्वविनश्यन्त य पश्यति स पश्यति ॥ १३ २७ ॥

* 11 सम पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मान ततो याति परा गतिम् ॥ १३ २८ ॥

18 प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वश ।
य पश्यति तथात्मानमकर्तार स पश्यति ॥ १३ २९ ॥

* 12 यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तार ब्रह्म सपद्यते तदा ॥ १३ ३० ॥

19 अनादित्वान्निर्गुणत्वात् परमात्मायमव्यय ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ १३ ३१ ॥

20 यथा सर्वगत सौक्ष्म्यादाकाश नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ १३ ३२ ॥

21 यथा प्रकाशयत्येक कृत्स्न लोकमिम रवि ।
क्षेत्र क्षेत्री तथा कृत्स्न प्रकाशयति भारत ॥ १३ ३३ ॥

22 क्षेत्रक्षेत्रज्ञयोरेवमन्तर ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्ष च ये विदुर्यान्ति ते परम् ॥ १३ ३४ ॥

Otto has frequently called attention to the way in which the Vedantic corrector by inserting his own peculiar doctrines at the proper point creates a prejudice in favour of a Vedantic interpreta tion of the whole passages by perverting its original Samkhya bias If this be really so a strong case will have been made for the theory of a final synthetic redaction of the Bhagavadgita by a philosopher of no mean order We wish however to draw attention to just two points In XIII 7 11 knowledge is explained not by its contents (as we should have expected) but by its effects It is not therefore the knowledge which comes from without but is born from within Secondly the proper interpretation of stanzas XIII 24 25 and particularly stanza 24 has an important bearing on the ultimate teaching that is here sought to be conveyed Ottos trans lation (p 86) and the note attached to it presuppose three parallel ways of knowing the Atman (i) the introspective or meditative method of direct intuition (ii) the reflective or the anumana method and (iii) the Karma yoga One fails to see how Karma yoga is to

ead to knowledge of Ātman Otto however cleverly hoodwinks the unwary reader In the line—

अन्ये साङ्ख्येन योगेन, कर्मयोगेण चापरे ।

*yogena* is rendered as by the method of The methods are then two Sāmkhya and *karman* Otto wants us to understand by "karman" the prāṇāyāma and other Yoga technique, as though the text read not *karmayogena* but *Yogayogena* How, further, does this method of Yoga technique differ from (1) Dhyāna? The passage is rather ticklish My own interpretation of it has been given by me in my *Basu Mallik Lectures*, p 130

Tract V consists of the 29 stanzas of the fifth Chapter *minus* 11 stanzas of gloss by the ubiquitous 'Brahman theologue. It increases the extent of the Poem to 346 stanzas Its text is as follows—

## FIFTH TRACT

(Unity of Sāmkhya and Yoga an Appendix to Tract IV)

V 1—29

अर्जुन उवाच—

1 संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ ५ १ ॥

श्रीभगवानुवाच—

2 संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ ५ २ ॥

3 ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते ॥ ५ ३ ॥

4 साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ५ ४ ॥

5 यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ५ ॥

* 1 संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ५ ६ ॥

* 2 योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ५ ७ ॥

6 नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन् स्पृशञ्जिघ्रन्नश्नन् गच्छन् स्वपञ्श्वसन् ॥ ५ ८ ॥

7 प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ५ ९ ॥

* 3 ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ ५ १० ॥

8 कायेन मनसा बुद्धया केवलैरिन्द्रियैरपि ।
योगिन कर्म कुर्वन्ति सङ्ग त्यक्त्वात्मशुद्धये ॥ ५ ११ ॥

9 युक्त कर्मफल त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्त कामकारेण फले सक्तो निबध्यते ॥ ५ १२ ॥

10 सर्वकर्माणि मनसा सन्यस्यास्ते सुख वशी ।
नवद्वारे पुरे देही नैव कुर्वन कारयन् ॥ ५ १३ ॥

11 न कर्तृत्व न कर्माणि लोकस्य सृजति प्रभु ।
न कर्मफलसयोग स्वभावस्तु प्रवर्तते ॥ ५ १४ ॥

12 नादत्ते कस्यचित् पाप न चैव सुकृत विभु ।
अज्ञानेनावृत ज्ञान तेन मुह्यन्ति जन्तव ॥ ५ १५ ॥

13 ज्ञानेन तु तदज्ञान येषा नाशितमात्मन ।
तेषामादित्यवज्ज्ञान प्रकाशयति तत् परम् ॥ ५ १६ ॥

14 तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणा ।
गच्छन्त्यपुनरावृत्ति ज्ञाननिर्धूतकल्मषा ॥ ५ १७ ॥

* 4 विद्याविनयसपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिता समदर्शिन ॥ ५ १८ ॥

* 5 इहैव तैर्जित स्वर्गो येषा साम्ये स्थित मन ।
निर्दोष हि सम ब्रह्म तस्माद्ब्रह्मणि ते स्थिता ॥ ५ १९ ॥

* 6 न प्रहृष्येत् प्रिय प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसमूढो ब्रह्मविद्ब्रह्मणि स्थित ॥ ५ २० ॥

* 7 बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ ५ २१ ॥

* 8 ये हि सस्पर्शजा भोगा दु खयोनय एव ते ।
आद्यन्तवन्त कौन्तेय न तेषु रमते बुध ॥ ५ २२ ॥

15 शक्नोतीहैव य सोढु प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भव वेग स युक्त स सुखी नर ॥ ५ २३ ॥

* 9 योऽन्त सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव य ।
स योगी ब्रह्मनिर्वाण ब्रह्मभूतोऽधिगच्छति ॥ ५ २४ ॥

* 10 लभन्ते ब्रह्मनिर्वाणमृषय क्षीणकल्मषा ।
छिन्नद्वैधा यतात्मान सर्वभूतहिते रता ॥ ५ २५ ॥

* 11 कामक्रोधवियुक्ताना यतीना यतचेतसाम् ।
अभितो ब्रह्मनिर्वाण वर्तते विदितात्मनाम् ॥ ५ २६ ॥

16 स्पर्शान् कृत्वा बहिर्बाह्याश्चक्षुश्चैवान्तरे भ्रुवो ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ ५ २७ ॥

17 यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायण ।
विगतेच्छाभयक्रोधो य सदा मुक्त एव स ॥ ५ २८ ॥

18 भोक्तार यज्ञतपसा सर्वलोकमहेश्वरम् ।
सुहृद सर्वभूताना ज्ञात्वा मा शान्तिमृच्छति ॥ ५ २९ ॥

Tract V is regarded by Otto as a sort of an appendix or a complement of Tract IV, both presumably hailing from the same author, or same circle of thought Like Tract IV this one also tries to establish the unity of Sāmkhya and Yoga One emphasises the intellect, the other the will, but both lead to the same goal of Śānti or peace The Sāmkhya is described in stanzas 8 9 and 13 17 and Yoga in stanzas 11 12, 23, and 27 29 Otto rejects Garbe's stigmatisation of stanzas 16 17 as Vedāntic interpolation, but in other respects he agrees in rejecting 11 stanzas (from a total of 29) Both the Master and the Pupil seem to alike fight shy of the word 'Brahman", the former more consistently than the latter

What Otto forgets is that Arjuna wanted definitely to know which of the two—not Sāmkhya and Yoga but Karma samnyāsa and Karma yoga—was to be preferred In stanza 2 Kṛṣṇa expresses his preference for Yoga or Karmayoga, but is he not expected to give reason for his preference? The analogy of Mahābhārata XII 301(=Kumbhakonam 306) which Otto adduces does not quite apply, as the topic dealt with is not exactly the same, but assuming it to be so for the sake of argument, the 'Brahman theologue" who, by inserting 11 stanzas here and there is able to produce nearly the same result as the person responsible for giving a Vedāntic ending to the Mahabhārata chapter in question, will have to be regarded as an author with a definite and comprehensive purpose in view Further, in all seriousness, we must ask what could have possibly led our "Brahman theologue' to intersperse his own interpolations in so haphazard a fashion? It would require more arguments than what Otto has in his armoury to convince an unbiassed reader of his thesis

Tract VI is the largest single addition to the Gītā that Otto permits It extends over 107 stanzas and it has undergone, according to Otto s showing tampering to the extent of 32 additional stanzas (indicated by us by starred numbering) by at least five if not seven different glossators Amongst these is of course our usual friend the "Brahman theologue," but there is also the Advaitic theist and the Dvaita theist, besides two or three petty, non descript authors[1]

The Tract, according to Otto is designed to set forth at first the Seśvara-Yoga as the basis for a superstructure of Viśiṣṭādvaita

---

1 Namely, the Brahman theologue, starred numbers 28 32, Dvaita Theist, Nos 22 27 Advaita Theist, Nos 2 7, Mythologist, Nos 16-21, Imitator of Tract VIII, Nos 8-11, Miscellaneous, Nos 1, 12 15

Bhakti of an inchoate type and not yet as a completed system of philosophy The Tract which covers Chapters VI to IX of the Gitā says Otto, presupposes Tract V, i e, Chapter V of the Gitā and therefore necessarily Tract IV (Chapter XIII) to which Tract V is an appendix Tract VI raises the same question as Tract V, but aims at giving a more precise and correct answer to it There must have been according to Otto two separate authors of these Tracts Tract VI sets forth (*stanza* VI 15) the Nirvana as the ideal and not the Sāmkhya Kaivalya of Tract V Subsequent to the addition of this Tract the Gita became a Poem of 453 stanzas. The text of the Tract runs as follows—

## SIXTH TRACT

( *Bhakti theology on the basis of* ऐश्वरयोग )

VI—IX

श्रीभगवानुवाच—

1 अनाश्रित कर्मफल कार्यं कर्म करोति य ।
स सन्यासी च योगी च न निरग्निर्न चाक्रिय ॥ ६.१ ॥

2 य सन्यासमिति प्राहुर्योग त विद्धि पाण्डव ।
न ह्यसन्यस्तसकल्पो योगी भवति कश्चन ॥ ६ २ ॥

* 1 आरुरुक्षोर्मुनेर्योग कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शम कारणमुच्यते ॥ ६ ३ ॥

3 यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसकल्पसन्यासी योगारूढस्तदोच्यते ॥ ६ ४ ॥

4 उद्धरेदात्मनात्मान नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मन ॥ ६ ५ ॥

5 बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जित ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ६ ॥

6 जितात्मन प्रशान्तस्य परमात्मा समाहित ।
शीतोष्णसुखदु खेषु तथा मानापमानयो ॥ ६ ७ ॥

7 ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रिय ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चन ॥ ६ ८ ॥

8 सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ६.९ ॥

9 योगी युञ्जीत सततमात्मान रहसि स्थित ।
एकाकी यतचित्तात्मा निराशीरपरिग्रह ॥ ६ १० ॥

10 शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन ।
नात्युच्छ्रित नातिनीच चैलाजिनकुशोत्तरम् ॥ ६.११ ॥

40 योगिनामपि सर्वेषा मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मा स मे युक्ततमो मत ॥ ६ ४७ ॥

[ श्रीभगवानुवाच— ]

41 मय्यासक्तमना पार्थ योग युञ्जन् मदाश्रय
असशय समग्र मा यथा ज्ञास्यसि तच्छृणु ॥ ७.१ ॥

42 ज्ञान तेऽह सविज्ञानमिद वक्ष्याम्यशेषत ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ ७ २ ॥

43 मनुष्याणा सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धाना कश्चिन्मा वेत्ति तत्त्वत ॥ ७.३ ॥

44 भूमिरापोऽनलो वायु ख मनो बुद्धिरेव च ।
अहकार इतीय मे भिन्ना प्रकृतिरष्टधा ॥ ७ ४ ॥

45 अपरेयमितस्त्वन्या प्रकृति विद्धि मे पराम् ।
जीवभूता महाबाहो ययेद धार्यते जगत् ॥ ७ ५ ॥

46 एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अह कृत्स्नस्य जगत प्रभव प्रलयस्तथा ॥ ७.६ ॥

47 मत्त परतर नान्यत् किंचिदस्ति धनजय ।
मयि सर्वमिद प्रोत सूत्रे मणिगणा इव ॥ ७.७ ॥

* 8 रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययो ।
प्रणव सर्ववेदेषु शब्द खे पौरुष नृषु ॥ ७ ८ ॥

* 9 पुण्यो गन्ध पृथिव्या च तेजश्चास्मि विभावसौ ।
जीवन सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ७ ९ ॥

* 10 बीज मा सर्वभूताना विद्धि पार्थ सनातनम्
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ ७ १० ॥

* 11 बल बलवतामस्मि कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ७ ११ ॥

48 ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान् विद्धि न त्वह तेषु ते मयि ॥ ७ १२ ॥

49 त्रिभिर्गुणमयैर्भावैरेभि सर्वमिद जगत् ।
मोहित नाभिजानाति मामेभ्य परमव्ययम् ॥ ७.१३ ॥

50 दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेता तरन्ति ते ॥ ७.१४ ॥

51 न मा दुष्कृतिनो मूढा प्रपद्यन्ते नराधमा ।
माययापहृतज्ञाना आसुर भावमाश्रिता ॥ ७ १५ ॥

52 चतुर्विधा भजन्ते मा जना सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ ७.१६ ॥

53 तेषा ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमह स च मम प्रिय ॥ ७ १७ ॥

54 उदारा सर्वे एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थित स हि युक्तात्मा मामेवानुत्तमा गतिम् ॥ ७ १८ ॥

55 बहूना जन्मनामन्ते ज्ञानवान् मा प्रपद्यते ।
वासुदेव सर्वमिति स महात्मा सुदुर्लभ ॥ ७ १९ ॥

56 कामैस्तैस्तैर्हृतज्ञाना प्रपद्यन्तेऽन्यदेवता ।
त त नियममास्थाय प्रकृत्या नियता स्वया ॥ ७ २० ॥

57 यो यो या या तनु भक्त श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचला श्रद्धा तामेव विदधाम्यहम् ॥ ७ २१ ॥

58 स तया श्रद्धया युक्तस्तस्या राधनमीहते ।
लभते च तत कामान् मयैव विहितान् हि तान् ॥ ७.२२ ॥

59 अन्तवत् तु फल तेषा तद्भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ ७ २३ ॥

60 अव्यक्त व्यक्तिमापन्न मन्यन्ते मामबुद्धय ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ ७ २४ ॥

61 नाह प्रकाश सर्वस्य योगमायासमावृत ।
मूढोऽय नाभिजानाति लोको मामजमव्ययम् ॥ ७ २५ ॥

62 *वेदाह समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मा तु वेद न कश्चन ॥ ७ २६ ॥

63 इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि समोह सर्गे यान्ति परंतप ॥ ७ २७ ॥

64 येषा त्वन्तगत पाप जनाना पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मा दृढव्रता ॥ ७ २८ ॥

65 जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदु कृत्स्नमध्यात्म कर्म चाखिलम् ॥ ७ २९ ॥

66 साधिभूताधिदैव मा साधियज्ञ च ये विदु ।
प्रयाणकालेऽपि च मा ते विदुर्युक्तचेतस ॥ ७ ३० ॥

अर्जुन उवाच—

* 12 किं तद्ब्रह्म किमध्यात्म किं कर्म पुरुषोत्तम ।
अधिभूत च किं प्रोक्तमधिदैव किमुच्यते ॥ ८ १ ॥

* 13 अधियज्ञ कथ कोऽत्र देहेऽस्मिन् मधुसूदन ।
प्रयाणकाले च कथ ज्ञेयोऽसि नियतात्मभि ॥ ८ २ ॥

श्रीभगवानुवाच—

* 14 अक्षर ब्रह्म परम स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्ग कर्मसंज्ञित ॥ ८ ३ ॥

* 15 अधिभूत क्षरो भाव पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृता वर ॥ ८ ४ ॥

67 अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम् ।
य प्रयाति स मद्भाव याति नास्त्यत्र सशय ॥ ८ ५ ॥

68 यं य वापि स्मरन् भाव त्यजत्यन्ते कलेवरम् ।
त तमेवैति कौन्तेय सदा तद्भावभावित ॥ ८ ६ ॥

69 तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसशयम् ॥ ८ ७ ॥

70 अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परम पुरुष दिव्य याति पार्थानुचिन्तयन् ॥ ८ ८ ॥

71 कविं पुराणमनुशासितार-
मणोरणीयासमनुस्मरेद्य ।
सर्वस्य धातारमचिन्त्यरूप-
